किं वा वैरीन्धनदहि मयि प्रौढमानस्त्वमेत-

न्नाभिप्रेयाः किमपरमहो नो विलम्बेन तिष्ठ ।

त्वामद्यैवान्तकमुखबिलं प्रापयामि त्वकं मे

मार्गं मत्तः श्रुणु[5] कथयतस्त्वत्प्रयाणानुरूपम् ॥ ४९॥ (Megha 13a)

श्रेयोमार्गान्न हि जिनमताद्भ्रंशितस्यैक एव

मार्गोऽसह्यादसुखविषधेर्नारकात्तारको यः ।

तं मुक्त्वा ते श्रुतिसुखपदं वच्मि यत्र प्रियायाः

संदेशं मे तदनु जलद श्रोष्यसि श्रव्यबन्धम्[6] ॥ ५०॥ (Megha 13b)

तत्राऽप्येकोऽनृजुर्ऋजुरतः कोऽपि पन्थास्तयोर्यो

वक्रोऽपि त्वा नयति सुखतस्तं शृणु प्रोच्यमानम् ।

नानापुष्पद्रुमसुमनसां सौरभेणाततेषु

खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र ॥ ५१॥ (Megha 13c)

यस्मिन् रम्याः कृतकगिरयः सेव्यसानुप्रदेशाः

नानावीरुद्वितितिसुभगाः पुष्पशय्याचितान्ताः ।

तेन व्रज्या तव सुखकरी तत्र याय्याः सुखेन

क्षीणः क्षीणः परिलघुपयः स्रोतसां चोपभुज्य ॥ ५२॥ (Megha 13d)

कामं याय्याः पथि निगदिते कामगत्या विमानं

प्रीत्यारूढः प्रथितमहिमा वारिवाहीव बन्धो ।

दृष्टोद्योगे नभसि विरहन् खेचरीभिस्त्वमुच्चै-

रद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभिः ॥ ५३॥ (Megha 14a)

मय्यामुक्तस्फुरितकवचे नीलमेघायमाने

[5]तावच्छृणु

[6]श्रोत्रपेयम्

सम्प्राप्योच्चैर्विरचित इवानीलरत्नस्त्वयीम् ।

क्रीडाशैले यदि च [36]विहरेत्पादचारेण गौरी (Megha 62b)

मा स्म स्फूर्जः सितिफणिभयान्मा स्म सङ्क्षेदिनी भूत् ॥ ७५॥

इन्द्राणी चेदुपगतवती जैनगेहानुपातं

तस्मिन्निज्यां रचयितुमना देवभक्त्या तदास्याः।

भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः (Megha 62c )

सोपानं त्वं कुरु मणितटारोहणायाग्रचारी[37] ॥ ७६॥ (Megha 62d)

अन्तस्तोयोच्चलनसुभगां भाविनीं तामवस्थां

मन्वानांस्तास्सुनिभृततरं सानुदेशे निषण्णम् ।

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं (Megha 63a)

नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् ॥ ७७॥ (Megha 63b)

आकर्षन्तयो दृतिमिव सरस्तोयपूर्णामधस्तात्

क्रीडिष्यन्ति त्रिदशवनितास्त्वामितश्चामुतश्च ।

ताभ्यो मोक्षो यदि तव[38] सखे घर्मलब्धस्य न स्यात् (Megha 53c)

क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भीषयेस्ताः[39] ॥ ७८॥ (Megha 63d)

कृच्छ्रान्मुक्तो विविधकरणैस्तत्र रन्त्वाऽथ ताभि-

र्भूयः शैले विहर गमितो वायुनाऽऽप्तव्रणाङ्गम् ।

हेमाम्भोजप्रसवि सलिलं मानसस्याऽऽददानः (Megha 64)

कुर्वन्कामं[40] क्षणमुखपटप्रीतिमैरावणस्य[41] ॥ ७९॥ (Megha 64b)

---

[36]विचरेत्

[37]मणितटारोहणायाग्रयायी

[38]मोक्षस्तव यदि सखे

[39]भार्ययेस्ताः

[40]कुर्वन्कामात्

[41]ऐरावतस्य

